**२०२१-२२**

**शास्त्री-परीक्षा**

**खण्डः- प्रथमः, अधिसत्रं- प्रथमम्**

**विषयः-संस्कृतम् ('ख' वर्गः), पत्रं- सप्तमम्**

---

**समयः ३½ घण्टे** **सम्पूर्णाङ्कः- ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. यथेच्छं केचिदतिलघूत्तरीया अष्टौ प्रश्नाः समाधीयेरन् -** **८**

**क.** कति पदार्थाः?

**ख.** सामान्यं कतिविधम्?

**ग.** गन्धवती का?

**घ.** चक्षुः कस्य इन्द्रियम्?

**ङ.** ज्ञानाधिकरणं किम्?

**च.** रसनाग्राह्यो गुणः कः?

**छ.** घटप्रत्यक्षे कः सन्निकर्षः?

**ज.** अनुमानं कतिविधम्?

**झ.** लिङ्गं कतिविधम्?

**ञ.** हेत्वाभासाः कतिविधाः?

**२. केचन पञ्च सूक्ष्मलघूत्तरीयाः प्रश्नाः समाधेयाः -** **५**

**क.** अपांसुलानां धुरि कीर्तनीया का?

**ख.** आस्वादवद्भिः तृणानां कवलैः सम्राट् कस्याः? समाराधनतत्परोऽभूत्?

**ग.** कः मध्यमलोकपालः?

**घ.** गौरीगुरोः गह्वरं का आविवेश?

**ङ.** कः मृगेन्द्रस्य वधाय निषङ्गाद् उद्धर्तुमैच्छत्?

**च.** मन्त्रौषधिरुद्धवीर्यः भोगी इव कः अदहत्।

**३. केचन त्रयो लघूत्तरीयाः व्याख्येयाः -** **३x३=९**

**क.** गन्धस्य लक्षणं सभेदं निरूपयत।

**ख.** संयोगस्य कि लक्षणम्।

**ग.** कारणं कतिविधम्।

**घ.** घटप्रत्यक्षे कः सन्निकर्षः।

**ङ.** अनुमितिः का?

**४. सप्रसङ्गं कौचिद् द्वौ समाधेयौ।** **३x२=६**

**क.** श्रुतेरिवार्थं स्मृतिरन्वगच्छत् इत्यस्य अभिप्रायः।

**ख.** छायेव तां भूपतिरन्वगच्छत् इत्यस्य कोऽभिप्रायः?

**ग.** प्रसादचितानि पुरः फलानि अस्य श्लोकांशस्य व्याख्या विधेया।

५. रघुवंशमहाकाव्यानुसारेण दिलीपस्य गोसेवां निरूपयत। ५

**अथवा**

रघुवंशमहाकाव्यकारस्य परिचयं लिखत।

६. प्रत्यक्षप्रमाणं सभेदं निरूपयत **५**

**अथवा**

हेत्वाभासं सभेदं निरूपयत

**७. कौचिद् द्वौ समाधेयौ।** ४x२=८

**क.** वायोः किं लक्षणं कति च भेदाः?

**ख.** परामर्शस्य किं स्वरूपम्?

**ग.** समवायिकारणस्य किं लक्षणम्?

**८. किमपि श्लोकद्वयं ससन्दर्भं व्याख्येयम्।** **७x२=१४**

**क.** अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्रहितगन्धमाल्याम्।
वनाय पीतप्रतिबद्धवत्सां,
यशोधनो धेनुमृषेर्मुमोच।।

**ख.** व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः।

**ग.** स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्।।

**घ.** ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः।।

**९. कमप्येकं विषयमवलम्ब्य निबन्धो लेखनीयः-** **१०**

**क.** निर्वाणम्।

**ख.** अष्टाङ्गमार्गः।

**ग.** आर्यसत्यम्।

******************